Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 2 | ISSN : 2581- 6306

# श्रीललितासहस्रकाव्येतान्त्रिकतत्त्वस्यसमीक्षणम्

Manish Kumar Dubey
Assistant Professor, Mahatma Gandhi P.G. College, Fatehpur, U.P.

**Article Info**

**Publication Issue :**
March-April-2023
Volume 6, Issue 2
**Page Number :** 104-109
**Article History**
Received : 07 March 2023
Published : 15 April 2023

**शोधसारांशः**:- डामर्यादितः फटकारिणीपर्यन्तं स्वाभिः दशभिः पराशक्तिभिः आवृता वर्तते। हे मातः! भवतीं भजमानानां साधकानां भवती आत्यन्तिकं निःश्रेयसं विदधाति। यः भवत्याः ध्यानं स्मरणञ्च न करोति तं भवती योगदृष्ट्यापि न पश्यति। ते कदापि भवतीं प्राप्तुं न शक्नुवन्ति। आदौ भूमिकायामेव दत्तमस्ति यत् डामरतन्त्रं भवति तामसतन्त्रम् इति। **"डामर्याद्यैः परीतां पशुजनभयदां मांसधात्वैकनिष्ठाम्, गौडान्नासक्तचित्तां सकलसुखकरीं लाकिनीं भावयाम"**[21]। डामर्यादिशक्तिभिः परपूजितः आवेष्टितः भगवतीश्रीपराम्बाराजराजेश्वरी डामर्यादिरूपे विद्यमानायाम् अस्मान् समाजिकान्, भक्तान् अभयं प्रदानं करोतु। श्रीललितासहस्रकाव्ये प्रतिपादिततान्त्रिकतत्त्वानां विश्लेषणं मतधिया कृतम्। इतोऽपि बहुत्रस्थले तान्त्रिकतत्त्वानां वर्णनं वर्तते।

**मुख्यशब्दाः**:- ललितासहस्रकाव्य, तान्त्रिकतत्त्वः, आवेष्टितः, परपूजितः, साधकः।

अस्ति आद्यनादिकालात् प्रोह्यमानेयं भागीरथीरूपीकाव्यधारा। तस्याः धारायाः अनेकानेककवयः स्वकीयसामर्थ्यानुगुणेन निजशास्त्रानुशीलनधिया समयेन वर्धनं कुर्वन्तः वर्तन्ते। नास्ति एकैव पन्थाः अस्याः धारायाः अपितु अनेकाः पन्थानः उत वा अध्वनः वर्तन्ते। यथा- ऐतिहासिककाव्यम्, महाकाव्यम्, पुराणाद्युपजीव्यरूपकाव्यम् एवं स्तोत्राद्युपजीव्यकाव्यम् इति। एतेषु मार्गेषु अन्यतमं भवतिस्तोत्राद्युपजीव्यकाव्यम्।एषैव काव्यविधामनुसृत्य विंशतिशताब्द्याः राजस्थानजयपुरस्थकविश्रीहरिशास्त्रिदाधिचमहोदयः ब्रह्माण्डपुराणगतस्थश्रीललितासहस्रनाममुपजीव्यकृत्य राजराजेश्वरीश्रीललितादेव्याः प्रत्येकनाम्नोपरि माधुर्यगुणयुक्तवैदर्भीरीत्यां चमत्कारकारिसहृदयानुरञ्जककाव्यघटनानुकूलशब्दार्थयोः मनोहरपद्यानां रचनाकृत्य श्रीललितासहस्रकाव्यं लिलेख।

काव्यशास्त्रविदाचार्यैः कृतं यत् काव्यलक्षणं नियमश्च; यथा- **"सर्गोबन्धो महाकाव्यं तत्रैको नायको सुरः"**[1] इत्यादि पूर्णरूपेण काव्यमिदं काव्यलक्षणं नियमञ्च नानुसरति। यद्यपि काव्यमिदं पूर्णरूपेण भक्तिकाव्यमुत वा स्तोत्रकाव्यं वर्तते। काव्येऽस्मिन् कविवरेण्यः नाम्नानुरूपार्थयुक्तपद्यानां रचनां चकार। एतस्मिन् काव्ये भक्त्याध्यात्मिकधारायाश्च अविचलप्रवाहो दृश्यते। बहूनां काव्यानामनुशीलनेन ज्ञायते यत् सर्वेषु काव्येषु तु न परन्तु बहुषु काव्येषु भक्त्याध्यात्मिकधाराश्च द्रष्टुं शक्यते। तन्त्रसाहित्यग्रन्थं विहाय विरलमेव काव्यं स्यात् यस्मिन् तान्त्रिकतत्त्वानां समुल्लेखो वर्तते। अतः स्तोत्रकाव्यविधासु आगतं श्रीललितासहस्रकाव्यम्, किमस्ति तान्त्रिकतत्वमेतस्मिन् काव्ये? विदितमेवैतत्समेषां वृहस्पतिकल्पानां विद्वत्प्रकाण्डानाम् आर्यावर्ते (भारतवर्षे) द्विजवरैरनुष्टीयमानेषु कर्मसु यथा वैदिकं स्मार्तं पौराणिकं वाऽङ्गं प्रत्यङ्गमस्ति तथा तान्त्रिकमपि। यथा प्रत्यहमनुष्ठीयमानायां प्रातरादिसन्ध्यायां दिगबन्धमुद्राप्रदर्शनादिकम्। तत् सर्वं क्रियत एव। तथान्येषु कर्मसु। एवं यथा वेदानां प्रवर्तको भगवान्नादिनारायणो ब्रह्माणमुत्पाद्यतं वेदान्पाठयित्वा तद्द्वारा संसारे प्रवर्तयति तानिति। तथा तन्त्राण्यप्यादिनारायणेन

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

सङ्कर्षणशिवनारदादिभ्यः तैश्चान्येभ्य ऋषिभ्यः एवंरीत्या अथवा शिवेन पार्वत्यावेवं रीत्या वा प्रगटीकृतानीति। केचन विद्वांसः श्रुतीनामिव तन्त्राणामपि अपौरुषेयत्वं स्वीकुर्वन्ति।

किं नाम तन्त्रमिति जिज्ञासायां सति - **"विकासपूर्वं (विस्तारपूर्वम्) तत्पदाभिधेयस्य पदार्थस्य तत्त्वस्य वा त्राणं रक्षणं, स्वायत्तीकरणं तन्त्रशब्दाभिधेयतां गच्छति इति केचन"**[2] अर्थात् केषाञ्चित् वस्तूनां जीवानां प्राणीनाञ्च रक्षणं स्वायत्तीकरणञ्च नाम तन्त्रमिति। तन्त्रमिति शब्दस्य व्युत्पत्तिर्भवति **'तनोति तन्यते इति वा तन्त्रम्'**। तन्त्रशब्दं तनादिगणपठितसेटोभयपदीय-**'तनु विस्तारे'**[3] धातोः कर्त्रर्थे औणादिकष्ट्रनप्रत्यये पुनश्च स्वादिकार्ये सति तन्त्रम् इति रूपं निष्पद्यते।

तन्त्र इति शब्दस्य बहुषु अर्थेषु प्रयोगः दरीदृश्यते कोषे। यथा-

**तन्त्रं कुटुम्बकृत्ये सिद्धान्ते चौषधोत्तमे।**

**प्रधाने तन्तुवाये च शास्त्रभेदे परिच्छदे॥**

**श्रुतिशाखान्तरे हेतावुभयार्थप्रयोजके इति कर्त्तव्यतायां च॥ '**[4]

सम्प्रति समाजे तन्त्रशब्दस्य योऽर्थो प्रचलितो वर्तते स च रूढ्यार्थको अस्ति। यथा- मारणं मोहनम्, इन्द्रजालम्, उच्चाटनादिकञ्च। परन्तुतन्त्रशब्दस्य एतदेवअर्थःअस्ति इतितुन अपिच तन्त्रं भवति विज्ञानम्। यथा- अधुना विज्ञानस्य पारिभाषिकज्ञानान्तरं (Theoretical Knowledge) प्रयोगं (Practical) भवति। तद्वत् आगमशास्त्रस्य पारिभाषिकज्ञानात्परं यत् प्रयोगात्मकं ज्ञानं तद् भवति तन्त्रम्। निगमागमप्रतिपादितानां सिद्धान्तानां प्रयोगः भवति तन्त्रशास्त्रे।

तन्त्रशास्त्रेष्वपि सात्त्विकराजसतामसभेदेन वैष्णवशैवादिभेदेन वैदिकावैदिकभेदेनानेकप्रकारको व्यवहारः यथा दृश्यते तथैव संहिताऽऽगमरहस्यादिभेदेनापि बहुविधो भेदोऽवलोक्यते। तत्र सात्त्विकादिभेदः पञ्चरात्रान्तर्गतेश्वरसंहितायां सुस्पष्टं दृश्यते।

**विज्ञाय पुण्डरीकाक्षः अर्थजालं यथास्थितम्।**

**तद्बोधकं प्रणीतं यच्छास्त्रं तत्सात्त्विकं स्मृतम्॥**[5]

अर्थात् आगमशास्त्रं भवति सात्त्विकतन्त्रम्।

**तस्मात् ज्ञातेऽर्थजाते तु किञ्चित्तदवलम्ब्य च।**

**स्वबुद्ध्युन्मेषितस्यैव ह्यर्थजातस्य बोधकम्॥**

**ब्रह्मादिभिः प्रणीतं यत् तथा तदृषिभिर्द्विजाः।**

**ब्रह्मादिभिः परिश्रुत्य तत्संक्षेपात्मना पुनः॥**

**स्वविकलात्प्रणीतं यत् तत्सर्वं राजसं स्मृतम्।**

**केवलं स्वविकल्पोत्थैः कृतं यत्तामसं स्मृतम्॥**[6]

यामलतन्त्रं भवति राजसतन्त्रम्।डामरतन्त्रं वर्तते तामसतन्त्रम्।

सर्वेषु तन्त्रेषु भिन्नभिन्नदेवानां देवीनां च प्राधान्यं भवति। अतो हेतोः यस्मिन् तन्त्रे यस्य देवस्य प्राधान्यं भवति साधकाः तं देवम् इष्टदेवरूपेण स्वीकृत्य तस्मिन् प्रवृत्तो भवन्ति। यथा- वैष्णवतन्त्राणि तु विष्णुदेवताप्राधान्यं स्वीकृत्य प्रवृत्तानि। शैवानि शिवदेवतां प्राधान्यं स्वीकृत्य प्रवृत्तानि। एवं शाक्तानि, गाणपत्यादिनी च। वैदिकानि तु वैदिकानुष्ठेयपदार्थसम्बद्धानि सर्वोन्नयनतन्त्रादीनि। अवैदिकानि तन्त्रशास्त्रीयप्रसिद्धपदार्थसम्बद्धानि महामायाशम्बरतन्त्रादीनि। वैदिकान्यवैदिकान्येव

दक्षिणमार्गतन्त्राणि वाममार्गतन्त्राणि नाम्ना प्रसिद्धानि। सर्वाण्यप्येतानि तन्त्राणि नारायणशिवाद्युपदिष्टत्वेन वेदवत् स्वयं प्रमाणानि।

एतेषु सम्प्रदायेषु एकमन्यतमं सम्प्रदायं भवति शाक्तसम्प्रदायमिति। शक्त्यासम्बन्धित्वेन शाक्तमिति। चराचरात्मकसंसारस्य अभिन्ननिमित्तोपादानकारणरूपात्मके परब्रह्मण: स्वभाविकीशक्तिम् एव पराशक्ति वादिशक्ति इति नाम्नाऽभिधीयते। **"परास्य शक्तिर्विविधैव श्रुयते स्वाभाविकी ज्ञानबलक्रिया च"**[7]। एतस्या: शक्त्या: विषयप्रतिपादनकाले दशमहाविद्याया: प्रसङ्गो आगच्छति।

**"अथैता: दश वै देव्या मूर्तयो मम पश्य ता:।**

**महाविद्या इमा प्रोक्ता नामान्यासां तु वर्णये॥**

**काली तारा महाविद्या षोडशी भुवनेश्वरी।**

**भैरवी छिन्नमस्ता च सुन्दरी बगलामुखी॥**

**धूमावती च मातङ्गी महाविद्या दशैव ता:॥"**[8]

तन्त्रेषु षोडशी-सुन्दरी-उभौ भगवत्या: त्रिपुरसुन्दरीश्रीराजराजेश्वरीललितादेव्या: वाचकौ स्त:। भगवत्या: त्रिपुरसुन्दरीश्रीललितादेव्या: सहस्रनामोपजीव्यकृत्य रचित श्रीललितासहस्रकाव्ये उपदिष्टतान्त्रिकतत्त्वानाम् उल्लेखो एवं वर्तते-

**'सर्वारूणाया' स्तवभासुराभिर्भाभि: समस्तामपि रोदसीं ये**

**सिन्दूरपूर्णामिव भावयन्ति तेषां जगद्वश्यमवश्यमेति॥**[9]

**"वसनाभरणकुसुमकान्त्यादिकं सर्वमेवारूणं यस्या:"**[10] अर्थात् हे मात:! सर्वारूणायुक्तां भवतीं पृथिव्याकाशपरिव्याप्तां सिन्दूरपूर्णामिव य: साधक: ध्यानं करोति, स: सम्पूर्णमिदं विश्वं वशीकर्त्तुं समर्थो भवति। तन्त्रशास्त्रे प्रसिद्धमस्ति यत् कोऽपि कमपि, कामपि उत वस्तुमपि वशीकर्त्तुम् इच्छति चेत् स: शोणयुक्ताय देविललिताया: ध्यानं स्मरणं च कुर्यात्। यथा षोडशिकार्णवेऽपि उक्तम्-

**'उद्यत्सूर्यसहस्राभमात्मानमरुणप्रभम्।**

**साध्यमप्यरुणीभूतं चिन्तयेत्परमेश्वरी।**

**सर्वरक्तोपचारैस्तु पूजयेन्मुद्रया युतम्**

**यस्य नाम्नैव संयुक्तं स भवेद् दासवद्वशी॥ '**[11]

एवं प्रकारेण सर्वारुणवर्णयुक्तेन पुष्पेण वस्तुना च द्वारा एवं मुद्राविनिर्माय देव्या: स्मरणं करोति। यमुपलक्ष्यीकृत्य करोति स दासवत् तस्य अनुचर: भविष्यति।

**त्वां कौलिनीं ये शिवशक्तिसामरस्यैकरस्यां विधिना यजन्ति।**

**ते योगिन: कर्त्तुममकर्त्तुमप्यन्यथापि कर्त्तुं प्रभवो भवन्ति॥**[12]

एतादृशीं त्वां कौलिनीं देवीं ये विधिविधानेन यजन्ति ते कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थो भविष्यन्ति। उक्तं हि तन्त्रशास्त्रे 'कौलिनी' इत्यस्यार्थ: भवति कुलसम्बन्धिनी इति, वा स्थाने-स्थाने, पुरे-पुरे, गृहे-गृहे, ग्रामे, वने जनै: पूजनीया देवी इति।

**"अध: स्थितं रक्तं सहस्रदलकमलमपि कुलम्। तत्कर्णिकायां कुलदेवीदलेषु कुलशक्तयश्च सन्तीति। ईदृगर्थस्य कुलपदस्य परत: सम्बन्धसामान्यार्थे तद्धिते कौलम्। 'कुलं शक्तिरिति प्रोक्तमकुलं शिव उच्यते।(अर्थात् कुलपदस्यार्थ: शक्ति: भवति**

**एवम् अकुलपदस्यार्थः शिवः वर्तते) कुलेऽकुलस्य सम्बन्धः कौलमित्यभिधीयत' इति। शिवशक्तिसामरस्यं वा कौलं तद्वती कौलिनी बाह्याकाशावकाशे चक्रं विलिख्य तत्र पूजादिकं कौलमिति रूढ्योच्यत इति कश्चित्"**[13]

प्रायेण तन्त्रशास्त्रे शिवशक्त्योः सामरस्यं(ऐक्यभावम्) एव कौलम् उच्यते तत्सम्बन्धिनी कौलिनी इति। कौल वा कौलिनी तन्त्रमेव कौलिनि इति। कौल वा कौलिनीतन्त्रमेव भवति पृथकरूपेण।

**तन्त्रैश्चतुषष्टिमितैः शिवोक्तैस्तवैव पन्थाः समुदीर्यतेऽम्बा।**

**अङ्गानि तानीति च सर्वतन्त्ररूपाभिधानासि महामहेशि।।**[14]

हे महामहेशि! शिवेनोक्तं चतुषष्टितन्त्राणि, तेषु भवत्याः मार्गमेवोपदिष्टं वर्तते। हे अम्ब! सर्वाणि तन्त्राणि भवत्याः एव अङ्गभूतानि सन्ति। चतुषष्टितन्त्राणि भवन्ति इति भगवत्पादशङ्कराचार्योऽपि सौन्दर्यलहर्यामुक्तोऽस्ति- **"चतुषष्ट्या तन्त्रैः सकलमभिसन्धाय भुवनम्"**[15]। भगवत्पादाः वदन्ति यत् हे भगवति! क्षितितले अवतरितं भवत्याः तन्त्रं स्वच्छन्दं स्वतन्त्रञ्च वर्तते। चतुषष्टितन्त्रेषु केषाञ्चित् तन्त्राणामभिधानम् अत्र भवति।

1. महामायाशम्बरनामकस्यमोहनतन्त्रम्
2. योगिनीजालशम्बरतन्त्रम्
3. तत्त्वशम्बरतन्त्रम्
4. सिद्धभैरवतन्त्रम्
5. बटुकभैरवतन्त्रम्

इत्यादयः। एतेषु सर्वेषु तन्त्रेषु भगवतीश्रीत्रिपुरसुन्दर्याः श्रीविद्यातन्त्रं स्वतन्त्रम् अर्थात् प्रधानं वर्तते। अन्यानि सर्वाणि तन्त्राणि गौणरूपाणि भवन्ति। भगवत्याः तन्त्रैः कुण्डलिनीशक्तिजागरीकृत्य सहस्रारं प्रति नीयमानं भवति। अन्यानि सर्वाणि तन्त्राणि धर्मार्थकामानेव दातुं शक्यन्ते, परन्तु एकैव श्रीविद्यातन्त्रं वर्तते यत् सर्वान् पदार्थान् दातुम् अर्हति। अतः अधुनातनकाले श्रीविद्यातन्त्रस्य वा श्रीविद्यामन्त्रस्य साधकानां कृते सर्वप्रकारकव्यवस्थां भगवती स्वयमेव कल्पयति।

**"त्रिकोणायां भूमौ भवति सलिलं त्र्यस्रमनल-**

**स्त्रिकोणस्तस्मिन् वै वहति मरुदस्रै रसमितैः।**

**नभश्चक्रेणैतद्वलयितमहो भास्वरतरं**

**महायन्त्रायास्ते विलसति जगद् यन्त्रमतुलम्।।"**[16]

यन्त्राणि बहुप्रकारकाणि भवन्ति, यथा- पूजाचक्रं, पद्मचक्रं, लक्ष्मीचक्रम्, अमृतघटयन्त्रम्, मेरुलिङ्गयन्त्रमित्यादि। भगवत्याः अपि यन्त्राणि वर्तन्ते, यथा- श्रीचक्रम्, श्रीविद्यायन्त्रम्, सिद्धबज्रयन्त्रम् आदयः। एतानि यन्त्राणि श्रेष्ठतराणि सन्ति। देव्याः यन्त्रं स्वतन्त्रं भवति यतोहि एतानि कस्यापि आधारितं न भवन्ति। एतेषां यन्त्राणां महत् उपयोगं भवन् वर्तते।

**"येषां राजति हृदये पञ्चप्रेतासनासीना।**

**देवी त एव सिद्धा वशयन्ते पञ्चतत्त्वानि।।"**[17]

पञ्चप्रेतमयासने देव्यासीना येषां हृदये प्रकाशिता भवति ते मानवाः पञ्चतत्त्वान् वशीकर्तुं शक्यन्ते। भगवतीत्रिपुरसुन्दर्याः सिंहासनस्याधारभूताः पञ्चप्रेताः सन्ति। तेषां वर्णनं ज्ञानार्नवे तन्त्रे एवमस्ति-

**"पञ्चप्रेतान् महेशान् ब्रुहि तेषां तु कारणम्।**

**निर्जीवा अविनाशास्ते नित्यरूपाः कथं वद।।**

**साधु पृष्टं त्वया भद्रे! पञ्चप्रेतासनं कथम्।**

**ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥"**[18]

ब्रह्मा-विष्णु-रुद्र-ईश्वर-सदाशिवाश्च एते पञ्चप्रेताः सन्ति। यैः भगवत्याः आसनं निर्मितं वर्तते।

**"बीजं तन्मकरध्वजस्य विमलं पूर्णेन्दुशुभ्रं बभौ**

**त्वत्तो देवि यथा तनोस्तनुभृतां प्राणाभिधाना कला।**

**तस्मात्वां निजभक्तकामकलनाकल्पद्रुमन्तीं सुराः**

**'क्लींकारी' कथयन्ति ते चरणयोरर्चां प्रकुर्वन्ति च॥"**[19]

कामं बीजं करोतीति वा कामबीजस्वरूपेति वा क्लींकारस्य शिवकामस्य स्त्रीति वा क्लींकारी। अर्थात् क्लीम् इति शब्दस्य सृष्टिं कुर्वन्ती भगवतीललिताम्बा स्वयमेव क्लींरूपां वा क्लींकारी अस्ति। क्लीम् इति बीजमन्त्रं वर्तते। साधकः मन्त्रात् प्राग् इदं बीजमन्त्रं संयोज्य जपं करोति। अनेनैव तेषां कार्यसिद्धिं भवति।

**" 'डामर्यादिभिरावृता'सि दशभिः स्वाभिः परा शक्तिभिः**

**त्वं मातर्भजतां नृणां कलयसे कल्याणमात्यन्तिकम्।**

**येच त्वां न भजन्ति नैव च तनौ पश्यन्ति योगेक्षया**

**ते त्वाम्ब! सती चितं न हि कदाऽप्याप्तुं भवन्ति क्षमाः॥"**[20]

डामर्यादितः फटकारिणीपर्यन्तं स्वाभिः दशभिः पराशक्तिभिः आवृता वर्तते। हे मातः! भवतीं भजमानानां साधकानां भवती आत्यन्तिकं निःश्रेयसं विदधाति। यः भवत्याः ध्यानं स्मरणञ्च न करोति तं भवती योगदृष्ट्यापि न पश्यति। ते कदापि भवतीं प्राप्तुं न शक्नुवन्ति। आदौ भूमिकायामेव दत्तमस्ति यत् डामरतन्त्रं भवति तामसतन्त्रम् इति। **"डामर्याद्यैः परीतां पशुजनभयदां मांसधात्वैकनिष्ठाम्, गौडान्नासक्तचित्तां सकलसुखकरीं लाकिनीं भावयाम"**[21]। डामर्यादिशक्तिभिः परपूजितः आवेष्टितः भगवतीश्रीपराम्बाराजराजेश्वरी डामर्यादिरूपे विद्यमानायाम् अस्मान् समाजिकान्, भक्तान् अभयं प्रदानं करोतु।

अनेन प्रकारेण शोधपत्रेऽस्मिन् संक्षेपरूपेण श्रीललितासहस्रकाव्ये प्रतिपादिततान्त्रिकतत्त्वानां विश्लेषणं मतधिया कृतम्। इतोऽपि बहुत्रस्थले तान्त्रिकतत्त्वानां वर्णनं वर्तते।

**संकेतसूचिः**

1. साहित्यदर्पणः कारिकासंख्या 315
2. सरस्वतीसुषमा पत्रिका, तन्त्रविशेषाङ्कः, पृष्ठसंख्या-30
3. धातुपाठः पृष्ठसंख्या 68
4. मेदिनीकोशः पृष्ठसंख्या 31
5. ईश्वरसंहिता 1/57
6. तदेव 1/58-63
7. श्वेताश्वरोपनिषद्
8. संस्कृत-वाङ्मय का वृहद् इतिहास, पृष्ठसंख्या-367
9. ललितासहस्रकाव्यम् 1/49

10. ललितासहस्रनाम, सौभाग्यभास्करटीकासहितम्, पृष्ठसंख्या–72
11. भास्कररायग्रन्थावली द्वितीयोभाग: पृष्ठसंख्या 99
12. ललितासहस्रकाव्यम् 1/94
13. ललितासहस्रनाम, सौभाग्यभास्करटीकासहितम्, पृष्ठसंख्या 163
14. ललितासहस्रकाव्यम् 315
15. सौन्दर्यलहरी पद्यसंख्या 30
16. ललितासहस्रकाव्यम् 3/28
17. तदेव 3/49
18. ललितासहस्रनाम, सौभाग्यभास्करटीकासहितम्, पृष्ठसंख्या 235
19. ललितासहस्रकाव्यम् 7/22
20. तदेव 5/98
21. ललितासहस्रनाम, सौभाग्यभास्करटीकासहितम्, पृष्ठसंख्या 366

## सन्दर्भग्रन्थसूचि: प्रकाशनञ्च


1. विश्वनाथाचार्य:, साहित्यदर्पण:,सम्पादक:सत्यव्रतसिंह:, प्रकाशनकेन्द्र:चौखम्बाविद्याभवनम्, वाराणसी, संस्करणम्–2013
2. सरस्वतीसुषमापत्रिका, सम्पादकौ– श्रीकुबेरनाथशुक्ल:, श्रीव्रजवल्लभद्विवेदी च, प्रकाशनकेन्द्र: – सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:
संस्करणम् 1954
3. मेदिनीकोश:, सम्पादक: श्रीजीवानन्दविद्यासागरभट्टाचार्य:, प्रकाशनकेन्द्र: चौखम्बा, वाराणसी, संस्करणम् 1995
4. पाणिनि:, धातुपाठ:, सम्पादक: डाँ नरेशझा, प्रकाशनकेन्द्र: चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी संस्करणम् 1999
5. ईश्वरसंहिता, प्रकाशनकेन्द्र: चौखम्बासंस्कृतभवनम्, वाराणसी, संस्करणम् 1970
6. ईशादिनव उपनिषद्, प्रकाशनकेन्द्र: गीताप्रेस, गोरखपुर:, संस्करणम् 2002
7. आचार्यश्रीबलदेवउपाध्याय:, संस्कृत–वाङ्मय का वृहद् इतिहास, सम्पादक: प्रो0 ब्रजवल्लभद्विवेदी
प्रकाशनकेन्द्र: उत्तरप्रदेशसंस्कृतसंस्थानम्, लखनउ, संस्करणम् 1995
8. श्रीहरिशास्त्रीदाधीच:, ललितासहस्रकाव्यम्, प्रकाशक: गोविन्ददास जी का बाग, जयपुर:, संस्करणम् 1970
9. भास्कराचार्य:, ललितासहस्रनाम, सौभाग्यभास्करटीकासहितम्, प्रकाशक: चौखम्बासंस्कृतप्रतिष्ठानम्, वाराणसी, संस्करणम् 2013
10. भास्कररायग्रन्थावली द्वितीयोभाग:, सम्पादक: शीतलप्रसादोपाध्याय:, प्रकाशक: सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, संस्करणम् 1995
11. शङ्कराचार्य:, सौन्दर्यलहरी, सम्पादक: कुप्पूस्वामि:, प्रकाशक: भारतीयविज्ञानप्रेस, मद्रास:, संस्करणम् 1998